श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ द्वादशः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ द्वादशः सर्गः ॥

## शूर्पणखाया विवाहो रावणादीनां च परिणयो मेघनादस्य जन्म च

राक्षसेन्द्रोऽभिषिक्तस्तु भ्रातृभिः सहितस्तदा।
ततः प्रदानं राक्षस्या भगिन्याः समचिन्तयत्॥ **7.12.1** ॥

स्वसारं कालकेयाय दानवेन्द्राय राक्षसीम्।
ददौ शूर्पणखां नाम विद्युज्जिह्वाय राक्षसः॥ **7.12.2** ॥

अथ दत्त्वा स्वयं रक्षो मृगयामटते स्म तत्।
तत्रापश्यत् ततो राम मयं नाम दितेः सुतम्॥ **7.12.3** ॥

कन्यासहायं तं दृष्ट्वा दशग्रीवो निशाचरः।
अपृच्छत् को भवानेको निर्मनुष्यमृगे वने॥ **7.12.4** ॥

अनया मृगशावाक्ष्या किमर्थं सह तिष्ठसि।
मयस्तदाब्रवीद् राम पृच्छन्तं तं निशाचरम्॥ **7.12.5** ॥

श्रूयतां सर्वमाख्यास्ये यथावृत्तमिदं तव।
हेमा नामाप्सरास्तात श्रुतपूर्वा यदि त्वया॥ **7.12.6** ॥

दैवतैर्मम सा दत्ता पौलोमीव शतक्रतोः।
तस्यां सक्तमना ह्यासं दशवर्षशतान्यहम्॥ **7.12.7** ॥

सा च दैवतकार्येण गता वर्षाश्चतुर्दश।
तस्याः कृते च हेमायाः सर्वं हेममयं पुरम्॥ **7.12.8**॥

वज्रवैदूर्यचित्रं च मायया निर्मितं मया।
तत्राहमवसं दीनस्तया हीनः सुदुःखितः॥ **7.12.9**॥

तस्मात् पुराद् दुहितरं गृहीत्वा वनमागतः।
इयं ममात्मजा राजंस्तस्याः कुक्षौ विवर्धिता॥ **7.12.10**॥

भर्तारमनया सार्धमस्याः प्राप्तोऽस्मि मार्गितुम्।
कन्यापितृत्वं दुःखं हि सर्वेषां मानकाङ्क्षिणाम्॥ **7.12.11**॥

कन्या हि द्वे कुले नित्यं संशये स्थाप्य तिष्ठति।
पुत्रद्वयं ममाप्यस्यां भार्यायां सम्बभूव ह॥ **7.12.12**॥

मायावी प्रथमस्तात दुन्दुभिस्तदनन्तरः।
एवं ते सर्वमाख्यातं याथातथ्येन पृच्छतः॥ **7.12.13**॥

त्वामिदानीं कथं तात जानीयां को भवानिति।
एवमुक्तं तु तद् रक्षो विनीतमिदमब्रवीत्॥ **7.12.14**॥

अहं पौलस्त्यतनयो दशग्रीवश्च नामतः।
मुनेर्विश्रवसो यस्तु तृतीयो ब्रह्मणोऽभवत्॥ **7.12.15**॥

एवमुक्तस्तदा राम राक्षसेन्द्रेण दानवः।
महर्षेस्तनयं ज्ञात्वा मयो हर्षमुपागतः॥ **7.12.16**॥

दातुं दुहितरं तस्मै रोचयामास तत्र वै।
करेण तु करं तस्या ग्राहयित्वा मयस्तदा॥ **7.12.17**॥

प्रहसन् प्राह दैत्येन्द्रो राक्षसेन्द्रमिदं वचः।
इयं ममात्मजा राजन् हेमयाप्सरसा धृता॥ **7.12.18**॥

कन्या मन्दोदरी नाम पत्न्यर्थं प्रतिगृह्यताम्।
बाढमित्येव तं राम दशग्रीवोऽभ्यभाषत॥ **7.12.19**॥

प्रज्वाल्य तत्र चैवाग्निमकरोत् पाणिसङ्ग्रहम्।
स हि तस्य मयो राम शापाभिज्ञस्तपोधनात्॥ **7.12.20**॥

विदित्वा तेन सा दत्ता तस्य पैतामहं कुलम्।
अमोघां तस्य शक्तिं च प्रददौ परमाद्भुताम्॥ **7.12.21**॥

परेण तपसा लब्धां जघ्निवान् लक्ष्मणं यया।
एवं स कृत्वा दारान् वै लङ्काया ईश्वरः प्रभुः॥ **7.12.22**॥

गत्वा तु नगरीं भार्ये भ्रातृभ्यां समुपाहरत्।
वैरोचनस्य दौहित्रीं वज्रज्वालेति नामतः॥ **7.12.23**॥

तां भार्यां कुम्भकर्णस्य रावणः समकल्पयत्।
गन्धर्वराजस्य सुतां शैलूषस्य महात्मनः॥ **7.12.24**॥

सरमां नाम धर्मज्ञां लेभे भार्यां विभीषणः।
तीरे तु सरसो वै तु सञ्जज्ञे मानसस्य हि॥ **7.12.25**॥

सरस्तदा मानसं तु ववृधे जलदागमे।
मात्रा तु तस्याः कन्यायाः स्नेहेनाक्रन्दितं वचः॥ **7.12.26**॥

सरो मा वर्धयस्वेति ततः सा सरमाभवत्।
एवं ते कृतदारा वै रेमिरे तत्र राक्षसाः॥ **7.12.27**॥

स्वां स्वां भार्यामुपादाय गन्धर्वा इव नन्दने।
ततो मन्दोदरी पुत्रं मेघनादमजीजनत्॥ **7.12.28**॥

स एष इन्द्रजिन्नाम युष्माभिरभिधीयते।
जातमात्रेण हि पुरा तेन रावणसूनुना॥ **7.12.29**॥

रुदता सुमहान् मुक्तो नादो जलधरोपमः।
जडीकृता च सा लङ्का तस्य नादेन राघव॥ **7.12.30** ॥

पिता तस्याकरोन्नाम मेघनाद इति स्वयम्।
सोऽवर्धत तदा राम रावणान्तःपुरे शुभे॥ **7.12.31** ॥

रक्ष्यमाणो वरस्त्रीभिश्छन्नः काष्ठैरिवानलः।
मातापित्रोर्महाहर्षं जनयन् रावणात्मजः॥ **7.12.32** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे द्वादशः सर्गः॥